International Journal of Applied Research 2018; 4(1): 171-172



International Journal of Applied Research

**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2018; 4(1): 171-172
www.allresearchjournal.com
Received: 23-11-2017
Accepted: 25-12-2017

**डॉ० परमेश्वर साहु**
बथनाहा, तमुरिया, मधुबनी, बिहार, भारत

**Corresponding Author:**
**डॉ० परमेश्वर साहु**
बथनाहा, तमुरिया, मधुबनी, बिहार, भारत

# व्याकरणशास्त्रस्य परिचयः

**डॉ० परमेश्वर साहु**

**प्रस्तावना**

विद्यन्ते धर्मादयः पुरूषार्थाः यैस्ते वेदाः, इष्टप्राप्त्यपरिहारयोः अलौकिकमुपायं यो वेदयति स वेद इति। सकल शास्त्राणां मूलत्वेन वेद एव निगद्यते। तत्र शब्दब्रह्मणः प्राप्तेः उपायो वेदः, भर्तृहरिः–

**प्राप्त्युपायोनुकारश्च तस्य वेदो महर्षिभिः।**
**एकोऽप्यनकेवरर्त्मैव समाम्नातः पृथक् पृथक्।।** [1]

अस्य वेदपुरुषस्य स्वरूपं इत्थम्प्रतिपादयामास शिक्षाकारः–

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते।।**
**षिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्.गमधीत्यैव ब्रह्मलोक महीयते।।** [2]

तत्र वेदमुखस्य स्वरूपं संस्कृतव्याकरणं पारावारायते। एवं श्रूयते यदिदं शास्त्रं ब्रह्मा बृहस्पतये, बृहस्पतिरिन्द्राय, दन्द्रा भरद्वाजाय, भरद्वाज, ऋषिभ्यः, ऋषयः ब्राह्मणेभ्यः प्रोचुः।
अस्य व्याकरणस्य अष्टविधत्वं दृश्यते–

**प्रथमं प्रोच्यते ब्राह्मं द्वितीयमैन्द्रमुच्यते**
**याम्यं प्रोक्तं ततो रौद्रं वायव्यवारुणं तथा**
**सवित्रे च तथा प्रोक्तमष्टमं वैष्णवं तथा** [3]

केचित् तु नवविधत्वम्–

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।**
**सारस्वतं चापिशलं शाकलं पाणिनीयकम्।। इति।**

तत्र सर्वेषु व्याकरणेषु लौकिकवैदिकोभयविधशब्दसाधकतया पाणिनीययाकरणस्य प्राधान्यं बोभूयते। अस्य व्याकरणशास्त्रस्य परम्परायाः प्रकारद्वयन्दृश्यते। पाणिनेः पूर्वम् पाणिनेः अनन्तरम्

**व्याकरणरम्परा**

| **प्राक्परम्परा** | **अनन्तरपरम्परा** |
|---|---|
| इन्द्र–वायु–भागुरि | चन्द्रगोमिन्–देव |
| शाकल्य–गार्ग्य–गालब | नन्दीय–हेमचन्द्र |
| यास्क–आपिशलि | अनुभूतिस्वरूपाचार्य– |
| काशकृत्स्नादयः | बोपदेवजैनेन्द्रादयः |
| | इति रीत्या सम्प्रत्यपि |
| | प्रचलति परम्परा काचित्। |

वेदानां रक्षायै महर्षीणां पुरतः महत्त्वपूर्णः प्रश्न आसीत् यद् वेदस्य रक्षा कया रीत्या कार्या । तत्रापि संहितारक्षणे द्वौ पक्षावास्ताम, एका आन्तरिकी रक्षा द्वितीया च बाह्यरक्षा। आन्तरिकरक्षायां वेदाध्येतारः परिवर्तिनः कदाचिद् वेदार्थं न विस्मरन्तु ॑ साक्षात्कृतधर्माणो महर्षयाऽस्माकं कृते वेदव्याकर्तॄणि छन्द आदिशास्त्रात्रनि रचयामासुः येन वेदः कदाचिदगम्यो न भवतु। बाह्यरक्षाणार्थञ्च कदाचिन्मन्त्राणामुच्चारणे परिवर्तनं न भवतु। परवर्तिनोऽध्येतारो वेदमन्त्राणामुच्चारणे शुद्धरूपमतिहायाशुद्धोच्चारणं नं कुर्युः।

तत्र आन्तरिकरक्षणे एव वेदस्यार्थस्य रक्षणो पायः अपि संनिहित आसीत्। अतएव व्याकरण भाष्यकारो महर्षि पतङलिराह – 'य उदात्ते कर्त्तव्ये अनुदात्तं करोति खण्डिकोपाध्यायस्तस्मै चपेटां ददाति' इत्यासीत्परम्परा वेदरक्षणे।
तदर्थमेव यतमाना ऋषयो वर्ण – पद – सन्धि स्वराणां च विशिष्टो नियमो विधिधशिक्षा प्रान्तिशाख्यरूपेण प्रकटी चक्रु । तस्मिन्नय रक्षणोपायेषु प्रातिशाख्यानां रचनामपि कृतवन्तः ।
तत्रापि प्रातिशाख्येषु ऋग्वेदप्रातिशाख्यम्, सर्वतः प्राचीनम् अस्ति ततस्यैत्तिरीयप्रातिशाख्यम्, ततश्च वाजसनेयिप्रातिशाख्यम्, ततः पुष्पसूत्रम् शौनकीया चतुरध्यायिका, ततः ऋक्तन्त्रम्, ततश्च अथर्ववेद प्राचीनत्वम् प्रातिशाख्यस्य सम्बन्धः कयाचित् –शाखयैव भवति नानाविधज्ञानविज्ञानप्रतिपादकत्वेनातिगम्भीरं सुविस्तृतं च खलु वैदिकवाङ्मयमिति नाविदितं विदुषाम् । तस्यैव तदुभागक्रमेण विचारणीयान विवेचनीयांश्च विषयानधिकृत्येदं प्रातिशाख्यसाहित्यं प्रातिशाख्यवेदस्य लक्षणग्रन्थोऽस्ति । अनेन ग्रन्थेन वेदस्य बाह्यस्वरूपं निर्दिष्टं भवति । वेदाभ्यासस्तु पञ्चधा विभज्यते (1) अध्ययनम् (2) विचारः (3)अभ्यासः (4) जपः (5) अध्यापनञ्चेति। ऋक्प्रातिशाख्यस्य सूत्रेषु र्पंप्रकारकाणां वेदाणां विधिवद् वर्णनमस्ति। एतेष्वध्ययनं तु वेदश्रवणस्य द्योतकमस्ति । विचारोऽपि द्विधा भवति – अर्थतो लक्षणतश्चेति । निरूक्तकृता यास्केन कथितम् –

स्थाणुरयं भारहारः किलाभूत–अधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत सकलं भद्रमश्नुते –नाकमेति ज्ञानविधूतपाप्मा।। [4]

यः पुरूषो वेदं पठित्वा तस्यार्थं न जानाति सः स्थाणुरिव भारहारी भवति। यो हि पुरूषो वेदार्थं विजानाति सैव समस्तं कल्याणमाप्नोति । ज्ञानेन पापं विनाश्य स्वर्गं प्राप्नोति । एतदर्थमेव शास्त्रं कथयति –

लक्षणं यो न वेत्त्यृक्षु न कर्मफलभाग्भवेत् ।
लक्षणो हि मन्त्राणां सकलं भद्रमश्नुते।।

यो हि जनः ऋक् – लक्षणमज्ञात्वैव कार्यं करोत्यसौ कर्मफलं न शक्नोति। मन्त्रलक्षणज्ञातैव समग्रकल्याणफलमश्नुते । फलतो लक्षणस्य वर्णनमर्थज्ञानात्प्रागेव भवति, यतोऽर्थज्ञानं लक्षणपूर्वमेव भवति । शास्त्रीयवचनमस्ति–

'स्वरो वर्णोऽक्षरो मात्रा देवं योगार्षमेव च ।
मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे ।।'

तात्पर्यमिदमस्ति यत् मन्त्रार्थजिज्ञासन् जनान् प्रथमतः स्वर– वर्ण– अक्षर–मात्रा–देवता विनियोगार्षाणां ज्ञानं प्राप्तव्यम् । एतेषां पदार्थानां ज्ञानाय प्रातिशाख्यस्योपयोगोऽस्ति। प्रातिशाख्यस्याध्ययनस्य परिनिष्ठितफलमस्तिमन्त्राणां लक्षणज्ञानम्। अस्य स्पष्टनिर्देशः ऋक्प्रातिशाख्यस्य मङ्गलश्लोके एव सूत्रकारेण शौनकेन मुनिनाकृतमस्ति –

'तं पदमगर्भ परमं त्वादिदेवम् ।
प्रणम्यर्धा लक्षणमाह शौनकः ।।

**संदर्भाः**


1. वाक्यपदीयम् – कारिका– 4 ।
2. पा0शि0 श्लोकसंख्या– 41– 42 ।
3. भष्यिपुराणे ब्राह्मपर्वे ।
4. निरुक्तम्–1/16 ।